सर्वशास्त्रस्थानं[१] विजयपुरीमहामठम्

Anandaraj G.
Dept. of Sanskrit, HHMSPB NSS College for Women, Neeramankara,

'कुवलयमाला' इति प्राकृतभाषाचम्पू (८ शती) ऐतिहासिकेषु सुविदिता तैश्च बहुभिः समवेक्ष्यतेऽपि, बाणभट्टस्य (७ शती) हर्षचरिताख्यायिकावत्। जैनसूरिवर्य उद्योतनः चम्पूरचनां ७७८-सने राजस्थानप्रान्तस्थे जाबालीपुरे[२] (जबलपूर्) उषित्वा कृतवान्। कृतिरियं विरलां साहित्यशोभामावहतीति बहुमतम्, ततःपरञ्च कर्तुः सूरिवर्यस्य बहुविषयविज्ञत्वात् तात्कालिकभारतीयसंस्कृतेः परिज्ञानाय तस्याश्चेतिहासस्य पुनर्निर्माणायात्यन्तोपकारिणीत्यभिज्ञमतम्।[३] केरलेतिहासविषयकमान्ध्यं परिहर्तुं तथा दार्शनिकशिक्षासम्प्रदायमवगन्तुं च ग्रन्थोऽयम् आधिकारिकतया अवलम्बनार्हो वर्तते। अस्यां कथायां सूरिवर्य अष्टमशतककालिके केरलदेशे प्रचलितामध्ययनाध्यापनादिप्रथामधिकृत्य महान्तं विभवमुपस्थापयति।[४]

पूर्वसूरिभिरुमाकान्त[५] -नारायण[६] -केशव[७] प्रभृतिभिः ग्रन्थमेतमुपयुज्य बहवो विषयाः प्रकाशिताः[८]। तत्र उमाकान्तं विहायान्ये सर्वे प्रायः शाला-घडिकादीनुत्प्रेक्ष्य[९] केरलीयब्राह्मणानामायोधनकर्मपरे पठनव्याख्याने प्राधान्यतः कृतवन्तः। शाला-घटिकादिशब्दानामत्र नितरामभावात् 'मठ'शब्दस्य विशेषतः प्रस्तावाच्च तेषां कतिपय निष्कर्षा ऊहप्राया एवावशिष्यन्ते। उमाकान्तस्तु देशप्रकृति-आचारविशेष-विद्यास्थानादिसम्बद्धान् परामर्शान् ग्रन्थतो विविच्य मठविषये प्राथमिकं पठनं कृतवान्। ततोऽग्रे गत्वाऽत्र मठविषये या विस्तृता वर्णना ग्रन्थेऽस्मिन्नुपलभ्यते ततो देश-विद्यादिविषयकं विवरणं पृथक्कृत्वा तदुत्तरवर्तिनीभिः समानविषयवतीभिः 'अनन्तपुरवर्णनम्', 'उण्णुनीलिसन्देशम्' इत्यादिभिर्मणिप्रवालरचनाभिः सन्तोल्य च नूतनानि कानिचिदुपदर्शनानि प्रस्तूयन्ते। परिकरग्रन्थापेक्षया मूलप्राकृतरचना एवात्र प्रमाणीकृता[१०]। रत्नप्रभासूरिकृता[११] 'कुवलयमालाकथा' इति संस्कृतसंक्षेपश्च यथालाभमुपयुक्ता। परन्तु तस्मिन् संस्कृतसङ्क्षेपे मठविषयः यदत्र मुख्यस्तत्पूर्णतया त्यक्तः। अतः प्राकृतकोशादिसाहाय्येनानूच्यानुमीय च पुरस्क्रियतेऽत्र संस्कृते पाठः। पाठकरणमिदं पुनःशोधाय भवेदिति निवेद्य पुरोऽभियामः।

प्रसक्तः कथासन्दर्भः

कुवलयमालेति चम्पूनायिका विजयपुरिराज्ञो विजयसेनस्य दुहिताऽस्ति। तां परिणेतुकाम एव कुवलयचन्द्रकुमार अयोध्यात एकमासाधिककालमटनं कृत्वा विजयनगरीं प्राप्तवानिति श्रद्धेयोंऽशः। दक्षिणापथे विन्ध्यापुरीतः काञ्चीपुरीं प्रतिगच्छता सार्थवाहकगणेन सह यात्रां कृत्वा कथानायकः कुवलयचन्द्रो राजकुमारः का पुरीम् आगतवान्। काञ्चीपुरीतोऽनेकगिरिसरिन्महाटवीमुल्लङ्घ्य अनेकग्रामाकरपुरेषु कौतुकानि समीक्ष्य च पुनर्दक्षिणदेशमटता कुवलयचन्द्रकुमारेण 'मकराकरतटस्थितं दक्षिणमकराकरवेलाल ग्नं' 'विजयापुरवरी'विषयः प्राप्तः, महन्मठञ्च दृष्टम्। अत्र, विजयापुरीविषयः, तत्रस्थं महामठमिति बिन्दुद्वयमुपस्थितम्। तद्भागद्वयेन किञ्चिद्विव्रियते प्रथमो भाग ऐतिहासिकः, द्वितीयस्तु दार्शनिक इति भेदो मान्यः।

प्रथमो भागः - विजयापुरीविषयः

विजयापुरीविषयं विषि्ञ्जं च

कुवलयमालायां सूचिता विजयानगरी केरलेष्वेव स्यादिति आधुनिकैः ऐतिहासिकैर्निर्णीतम्।[१२] *परन्तु तिरु-अनन्तपुरस्य विजयपुरमिति नामाभावात् तन्नाम कविकल्पितमेवेत्यस्ति केषाञ्चिद्विचारकाणां मतम्, तत्पुनर्विचारणीयम्। तत्र 'वियिन', 'विनीत', 'विजया', 'विजयणयरी' 'विजयापुरी', 'विजयापुरवरी' इत्यादिभिर्नामभिः कुवलयमालायाः पाठ-पाठान्तरेषु अनेकशः पठिता पुरी 'विषि्ञ्ज'मेवेति संज्ञासामान्येन अन्यैर्विवरणैश्च निर्णेतुं शक्यम्।*

प्रथमं विजयापुरीविषयं (उ नगरप्रान्तदेशं) प्रविश्य नालिकेर-पूगादिवननिबिडं (कु.मा. २४२.७-९) विभिन्नजनावाससङ्कुलं (कु.मा. २४२.९-१८) च तं विषयं सुदूरमुदगतिक्रम्यैव कुमारेण 'ततो क्रमेण च दृष्टा सा विजया नगरी (कु.मा. २४२.१८)। अस्मत्कालिको विषि्ञ्जं-तिरुवनन्तपुरं-मार्ग एवात्र वर्णितः स्यात् (२० कि.मी.)। तमिल्नाटुतः समुद्रतीरमार्गेण केरलं प्राप्य तिरुवनन्तपुरं गच्छता उपर्युक्तनिबिडवनादियुक्ता एव देशाः द्वादशशतकालानन्तरमधुनापि द्रष्टुं शक्यन्ते।

विजयामहापुरी तिरुवनन्तपुरं च

इदानीन्तु पुरवरस्य नाम तिरुवनन्तपुरमिति। तत्तु अधुनापि केरलराजधानीति श्रद्धेयम्। यदि 'विजयपुरी' विषि्ञ्जमेव तदा अनेन नाम्ना तिरुवनन्तपुरं कथं

ग्राह्यमिति शङ्का स्यात्। इतिहासेन तत्प्रमाणयामः। पुराताननगराणां संस्कृतिस्था नानां नामपरिवर्तनं भवत्यपि तर्हि स्थानान्तरणं न भवतीति इतिहासे सामान्यतो नयो द्रष्टव्यः[१३]। तिरुवनन्तपुरस्य आनन्दपुरम्, आनन्तपुरम्, स्यानन्दूरपुरम्, अन न्तपुरमित्यादीनि नामानि दशमशतकादेव[१४] प्रकाशमायान्तीत्यपि प्रकरणेऽस्मिन् ध्येयम्।

ग्रीक्-रोमन् इत्यादिपश्चिमदेशैः यवनकालवाणिज्यं 'मुसिरिस्'(कोट्टुङ्ङल्लूर्) इति ख्यातेन तीरपत्तनमाध्यमेन यदासीत् तत्पञ्चमशतकादूर्ध्वं प्राप्तक्षयं दृश्यते। अनन्तरकाले चीनादिभिः पूर्वदेशैः सह वाणिज्यं पुष्टिमगादिति ऐतिहासिकसूच नादिभिरवगम्यते[१५]। तस्मिन्काले एव दक्षिणप्रान्तीयं विषिञ्जं सुप्रधानं समुद्रतीरपत्त नमिति ख्यातिमवाप इति श्रद्धार्हम्। विषिञ्जमिति पोताश्रयमारभ्य तिरुवन न्तपुरपर्यन्तं योजनात्रयं (२५ कि.मी.) यावद्स्थानं परस्परघटितं महापुररूपं प्राप्य सुदूरसमुद्रवाणिज्याय तस्मिन्काले तस्यैव पोताश्रयस्य नाम्नि प्रवर्तितमित्यूह्यम्।

विषिञ्जस्य प्राधान्यम्

तस्मिन्काले प्रायः सर्वा राजधान्यः समुद्रतीरपोताश्रयानां निकटदेशेष्वेव वर्तन्ते स्म। मुख्यपोताश्रयस्य नाम्नि एव राजधान्याः नगराणि च वणिग्गणद्वारा विदूरदेशेषु कीर्तितानि। तिरुवनन्तपुरस्य पोताश्रयो विषिञ्जमेवासीत्, अस्ति च। पोताश्रयस्य विषिञ्जस्य अद्वितीयत्वात् तस्यैव पुनःस्थापनाय नूतना पद्धतिराविष्क्रियते सम्प्रति सर्वकारैरित्यपि श्रद्धेयम्।

विषिञ्जस्य तु इतिहासप्रसिद्धमन्यं नाम न विद्यते। विषिञ्जस्य उच्चारणक्लेशं विहाय 'विजया' इति नाम्ना औत्तराहेण कविना कल्पना कृतेति निगमने न काप्यसमीचीनतां प्रतिभाति। देशिकनाम्नां भाषान्तरत्वाद् वैदेशिकलेखकैः यात्रिभिश्च तद्भवादिरूपान्तरं कृत्वैव तानि लिखितानीति सुविदितम् यथा प्राक्तनस्य विश्वप्रसिद्धस्य च केरलराजपत्तनस्य पोताश्रयः 'मुयिरि', 'मुचिरि', 'मुरचि', 'मुसिरिस्' इत्येवं बहुभेदेन व्यवह्रियमाणो दृश्यते तद्वत्।

अपि च विषिञ्ज-तिरुवनन्तपुरदेशस्य पूर्वस्मिन्काले कदाचिद् 'विजय'नाम्न्यपि व्यवहारः स्यादिति सम्भावनीयम्। केरल(चेरल)राजभिरर्थशास्त्रप्रसिद्धेन 'कुलसङ्घ'रूपेण राज्यभारो निर्वाहितः। देशमिदमधिकृत्य 'केरलेषु' इति भूयःप्रयोगस्तथा साधीयान्भवति।

केरलदेशस्य दक्षिणभागे कोट्टार्, विषिञ्जं□तिरुवनन्तपुरं, कोल्लम् इत्यादीनि स्थानानि चेरलकुलसङ्धानां तेषामुपराज्ञाञ्च राजधान्यो भवन्ति स्म। अष्टमशतककाले राजकलहः तदधीनश्च शासनोच्छेदो द्रमिले केरलेषु च बहुवारं घटमानावास्ताम्। कुवलयमालाकाले महोदयपुरस्थानां केरल(चेरल)पेरुमाळ्-राज्ञामाधिराज्यं 'आय्'-वेणाट्' आदीनामौपराज्यञ्च प्रवर्तितुमारब्धे, तदधीने चास्तां विषिञ्जं तिरुवनन्तपुरञ्च। तन्मध्ये चोल-पाण्ड्यनृपाः तत्स्थानान्याक्रम्य उपराजनिष्कासनं स्वाभिमतराजस्थापनं च कृतवन्तो दृश्यन्ते। राजकुलभेदवशेन यदाऽभीक्ष्णं शासकव्यवस्थापरिवर्तनमापद्यते तदा नगर-ग्रामादीनां नामभेदोऽपि मुहुर्मुहुर्भवतीति वास्तवम्। 'विजय' इति पुरस्य नामकरणं राजनामवशाच्च समुत्प्रेक्ष्यम् यथा कुवलयमालामनुसृत्यावलोक्यते चेत् तस्मिन्काले कश्चिद् 'विजयसेनः' आसीद्राजा। परं तस्य कुलादिविषये न किञ्चिद् उक्तमुद्योतसूरिणा। एष परामर्शो ग्राह्यस्ताज्यो वेति निर्णेतुं भूयश्शोधोऽपेक्षितः।

विजयतीर्थानि अनन्तपुरवर्णनात्

कुवलयमालाकालात् शतकत्रयानन्तरमुपलब्धासु कतिपयरचनासु एतद्विषयसम्बद्धाः समानसूचनाः मलयाल(मणिप्रवाल)भाषायां परिदृष्टाः। १३-१४ शतककालात् 'अनन्तपुरवर्णनम्' इति महत्वपूर्णरचना प्राप्यते। तस्याम् अनन्तपुरवर्णनारम्भे (९-१२ श्लोकेषु) ध्रुव-सगर-भागीरथादीनां चरितं स्मर्यते। (सगरादीनां वर्णना विजयपुरीवर्णनया सह कुवलयमालायामपि दृश्यते।) तृप्पाप्पूर् उत्तरदिशि पादवत्, तिरुवट्टार् दक्षिणदिशि, मध्ये तिरुवनन्तपुरमिति दशयोजनापर्यन्तेति अनन्तशयनप्रतिष्ठया पुरस्य योजनाबन्धः सूच्यते चतुर्दशश्लोके। अधुना तु ६५-७० कि.मी. दूरायतं स्थलमिदम्। तत्र मध्यस्थाने पुरवरे पार्थमुद्दिश्य पार्थेन वा निर्मितानि तीर्थानि बहून्यभूवन् इति अनन्तपुरवर्णनम् (१५-१०५)। तद्वद् 'अनन्तशयनक्षेत्रमाहात्म्य'मिति संस्कृतरचनायामपि तत्रत्यानि तीर्थानि प्राधान्येन उल्लिखितानि। तेषु कतिपयतीर्थानि अभिज्ञातानि, बहूनि चाज्ञातान्येव शिष्यन्ते।[१६] पार्थो विजय इत्यादीनि अर्जुनस्य पर्यायानीति विदितं खलु। विजयस्य नाम्नि प्रथितानि तीर्थानि यस्यां पुर्यां सा विजयपुरीति सम्भावनायामपि न काप्ययुक्तिः। तेषु बहूनां तीर्थानामद्यत्वे अभावात् कुवलयमालावद् अन्यत्रापि[१७] नगरप्रान्तस्य समुद्रान्तिकत्ववर्ण

नाच्च समुद्रस्य तिरुवनन्तपुरं नगरस्य च मध्ये अधुनातनं दूरं नासीदित्यवगम्येत। अस्मिन्विषये पूर्वविद्वद्भिः किञ्चिदन्वेषणं कृतम्, नाग्रे गतं पश्चात्कालिकैः।

सार्वदेशीया विपणिश्रेणिः

तेषु तीर्थेष्वन्यतमम् 'अनन्ततीर्थं' तीर्त्वा तस्य महापुरस्य गन्धर्वनगराकारं सिन्धुसागरनिस्वनवद्भूमिकोपेतं अलकापुरीतुल्यं आभ्यन्तरमापणं दर्शनश्रवणसुभगं सम्प्राप्यते[१८]। विदूरदेशस्थानां जनानां तेषां स्वीयभाषाप्रयोगभेदेन सह अनन्तपुरवर्णने (२९-९७ श्लोकेषु) रावण(आपण)श्रेण्या अतिदीर्घवर्णना कृता। केरलीयैः भाषाविद्भिः तस्याः प्राधान्यं सम्यगवहितम्।[१९] १२-१३ शतकीये उण्णुनीलिसन्देशेऽपि आपणं समानतया वर्णितम् (६३-६६ श्लोकाः)। सैव विपणिश्रेणिरिति कुवलयमालायां विस्तरेण ख्यापिता।

'परं पुनः केनोपायेनात्र कुवलयमाला द्रष्टव्या इति विचिन्त्य कुमारः सश्रद्धं व्रजति स्म। तस्मिन् व्रजने पयोहारिणीनां महिलानामनेकशो वार्ता शुश्राव। तथा अनेकदेशसमायातानां व्यवसायिनां विचित्राः भाषाः शृण्वन् विपणिश्रेणिमार्गे वणिजां विविधानुल्लापानाकर्णयन् च स विजयसेननरेश्वरस्य राजाङ्गणं प्रति प्रस्थित इति कुवलयमालायामुपवर्णितम्। तत्रत्यवर्णनानुसारेण विपणिश्रेणीगतदेशभाषा अष्टादश इति भाषाविदां निर्णयः।[२०] आश्चर्यमेतद्यद् उण्णुनीलिसन्देशेऽपि 'अमरसरणौ संस्कृत-प्राकृताअष्टादश एव भेदास्तत्र विपणीगतैर्जनैः प्रयुक्ता इति साक्षात्प्रस्तावितम्।[२१]

कान्तळूर् शाला, विजयपुरीमठञ्च

आपणस्येशानदिशि ईशानतीर्थमासीत्। तत्तीर्त्वा गन्तव्यं यत्स्थानं 'चाला/कान्तलूर् चाला' इति विख्यातम्, बहुभिर्लिखितैः राजशासनैश्च सिद्धञ्च[२२]। 'वलियशाला' इति अधुनाऽपि तत्रैव स्थानमस्ति; प्राचीनं कान्तलूर् त्रिमूर्तिक्षेत्रमपि ब्राह्मणमठाधिवासैः सह दृश्यते। क्षेत्रे राजेन्द्रचोलप्रशस्तिर्द्रष्टव्या[२३]। तत्समीपे एव किल्लियार्नदीतीरे चेरकुलसंघेष्वन्यतमानां कूपक(वेणाट्)राज्ञां राजधाम आसीत्[२४]। तेषां राजशाला एव कान्तलूर्-शालेति प्रसिद्धिरुपार्जिता। शालावर्णनम् अनन्तपुरवर्णने[२५] वैशद्येन कृतम्। कान्तियुञ्चेल्वमुं मिक्क कान्तळूर्च्चाल काणलां तोन्नुं तत्र मठङ्ङळुम् (१०७) इति अन न्तपुरवर्णने शाला मठानि च पृथक्त्वेन परामृश्यन्ते। कुवलयमालायान्तु मठमेव वर्णितम्। सभामठानि आविंशशतकं यावत् केरलेषु कतिपयस्थानेषु मीमांसादिपठन केन्द्ररूपेण

प्रवर्तितानि मुञ्चिरमठम्, तिरुवार्प्पुमठम्, उदयतुङ्गेश्वरं मठम्, चोव्वन्नूर् मठम् इत्यादीनि। प्रायः ब्राह्मणसभानामाध्यक्ष्ये प्रवर्तितानि एतानि मठानि। द्वादशशतकादूर्ध्वमेव तेषां काल इति ऐतिहासिकाः विश्वसन्ति। परन्तु कान्तळूर्-पार्थिवपुरसम्बद्धानि ताम्रशासनपट्टानि[२६] (८६४ सने) मुञ्चिरमठं शालापूर्वमपि स्थितमिति स्पष्टयन्ति। शालाद्वयस्यापि पाल नाधिकारः मुञ्चिरसभायां निक्षिप्तमासीदित्यपि शासनपठनेन गम्यते।[२७]

द्वितीयो भागः महामठम्

मठेषु अध्ययनं कृतवन्तः स्नातका एव राजकार्याय शालासु प्रवेष्टुं योग्या अभूवन्नित्यपि शासनेन गृह्यते। भट्टास्तत्र अध्यापकाः, चट्टा (छात्राः) नाम शिष्याश्च मठेषु निवसन्ति स्म। शास्त्राध्ययनेन सह शास्त्रव्याख्यानं, वेदाध्ययनेन सह वेदपारायणं, तदर्थं भिन्नमण्डल्यश्च प्रवर्तन्ते स्म मठेष्विति कुवलयमालातो ग्राह्यम्। 'पउत्तिं उवलहामि चिंतयंतो कं पि पएस (प्रवृत्तिमुपलभेति चिन्तयन्तो कमपि प्रदेशं) इति कुवलयमालायां[२८] 'स यावत्कियद्भूभागं व्रजति स्म इति कुवलयमाला कथासङ्क्षेपे[२९] च एकमेव विषयं वर्णितं यत्कुवलयचन्द्रः विजयापुरीं प्रविश्य किञ्चिद्दूरं भ्रमन्नेव मठान्तिकं प्राप्तवानिति। तदनन्तरमेव राजाङ्गणं प्रविशति। पुरादिवर्णम् चत्वारिंशद्यावद्भिः पङ्क्तिभिर्विवृत्याग्रे अशीतिर्यावत्सु पङ्क्तिषु महामठविषये विवरणमुपलभ्यते। तदत्र सङ्गृह्यते न्याय-मीमांसादिदार्शनिकदृष्ट्या यच्छ्रद्धेयमेव।

मठवर्णनं दर्शनादिविद्याविवरणञ्च

'तेन नगरिं प्रविशामि। 'सविशेषां हि प्रवृत्तिमुपलभे'ति चिन्तयन्नुपगतो कमपि प्रदेशम्। दृष्टं च महन्मठम्। तत्र प्रच्छनीय एको पुरुषः (दृष्टः)। 'भो भो पुरुष! इदं कस्य मन्दिरवरमस्ति? तेन भणितम् 'भट्ट!, भट्ट! न भवेदिदं मन्दिरं, किन्तु सर्वशास्त्रस्थानम् मठम्'। कुमारेण चिन्तितम् 'इदं मठं चेत् प्रविशामि'। प्रविष्ट मिदं मठम्। दृष्टाश्च तेन तस्मिन् छात्राः। ते च कीदृशाः पुनः? अपि च। तेषु केऽपि लाटाः, कर्णाटकाः, मालवीयाः,गोल्लाः(चाणक्यदेशस्थाः), महाराष्ट्रीयाः, ढक्काः, श्रीकण्ठीयाः (थानेश्वरवासिनः?) सैन्धवाश्च। किं पुनः क्रियमाणाः? अपि च। फलकक्रीडातः कुन्त-लगुड-बाह्वादिनियुद्धपर्यन्तं दशयावद्विद्याः धनुर्वेदं च अभ्यस्यन्तो दृश्यन्ते। आलेख-गीत-वाद्यादि नृत्त-नाट्यपर्यन्तानष्टयावत्कलाविधानपि

शिक्षन्ति। तत्रैवोन्मत्तवारणसदृशाः पलायन्तः पवित्राः कुमाराः। दृष्टा च तेन व्याख्या नमण्डली। चिन्तितं कुमारेण 'अरे, पृच्छामि पुनः किं सत्यं व्याख्यायते।' तत आलीनः (दृष्टा)) एकां व्याख्यानमण्डलिं यावत् प्रकृति-प्रत्यय-लोपागम-वर्ण-विकारादेश-समासोपसर्ग-मार्गणानिपुणं व्याकरणं व्याख्यायते। अन्यत्र रूप-रस-गन्ध-स्पर्श-शब्द-संयोग-मात्रा-कल्पना-रूपस्थ-क्षण-भङ्ग-भङ्गुरं बुद्धदर्शनं व्याख्यायते। क्वचिद् उत्पत्ति-विनाश-परिहारावस्तृत-नित्यग-स्वाभाविकरूप-प्रकृति-विशेषोपनीयसुख-दुः-खानुभवं सांख्यदर्शनम् अवग्राह्यते। क्वचिद् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-पदार्थ-रूप-निरूपणावस्थित-भिन्न-गुणानुवाद-प्ररूपणपराः वैशेषिकदर्शनं प्ररूपयन्ति। क्वचिच्च प्रत्यक्षानुमान-प्रमाणषट्कनिरूपित-नित्यजीवादि-नास्ति सर्वज्ञवाद-पद वाक्यप्रमाणवादिनो मीमांसया (प्ररूपयन्ति)। अन्यत्र प्रमाण-प्रमेय-संशय-निर्णय-छल-जाति-निग्रहस्थानवादिनो नैयायिकदर्शनपराः (व्याख्यायन्ते)। क्वचिच्च जीवाजीवादि-पदार्थानुगत-द्रव्यार्थिक-पर्याय-नय-निरूपणा-विभागोपालब्ध-नित्यानित्यानेकान्तवादं प्ररूपयन्ति। क्वचित् पृथिवी-जल-ज्वलन-ानिल-ाकाश-संयोग-विशेषोत्पन्न-चैतन्यं मद्यगमदमिव आत्मानो नास्तिवादपरा लौकायितकञ्चेति। इमानि च दृष्टेन कुमारेण चिन्तितम् 'अहो, विजया महापुरी! एवं दर्शनानि सर्वाण्यपि व्याख्यायन्ते।' द्वासप्तति-कलाकुशलाः, चतुष्षष्टिविज्ञानभृताश्चात्र दृश्यन्ते। तत्रैव पुनरन्यां दिशां गत्वा तत्र दृष्टाः अनेके द्वारवृत्ताः केवलवेदपाठमूलबुद्धिविस्तराः छात्राः। (२४३.१६-२४५.१२)

प्राकृतवाङ्मये व्याख्यानमण्डली

*मंडली - मण्डली। आवलिकाविशेषे [३०]। '***बिएणाबिणविसेस***'आवलिका-मण्डल्योः परस्परछिन्नाछिन्नरूपो विशेषः। या विच्छिन्ना एकान्ते भवति मण्डली साऽऽवलिका, या पुन स्वस्थाने एव सा मण्डली।* **'आवलिया एउ अंतएगत्ति। मण्डलीए सट्ठाणं** *[३१]... आवलिकायामुपाध्यायकोऽन्तः, मध्ये विविक्ते प्रदेशे, तिष्ठति। मण्डल्यां पुनः स्वस्थानम् - आभवनं च। 'एमेव मंडलीए वि पुव्वाहियनट्ठ धम्मकहि वादी। अहवा पइण्णग सुए, अहिज्जमाणे बहुसुतेधि।। सा मण्डली क्व भवतीति चेदुच्यते - १) पूर्वाधीते नष्टे उज्ज्वाल्यमाने धर्मकथायाम् धर्मकथाशास्त्रेषु, २) वादे वादशास्त्रेषु उज्ज्वाल्यमानेष्वधीयमानेषु च, ३) अथवा प्रकीर्णकश्रुते अधीयमाने, ४)*

बहुश्रुतेऽपि, बहुश्रुतविषयेऽपि, मण्डली भवति[३२]। एतदर्थचतुष्टयमपि युक्तमत्र मठविषये।

षड्विधव्याख्यानार्था[३३] मण्डली व्याख्यानमण्डली। तस्यां मण्डल्यां भिन्नशास्त्राण्यधिकृत्य अवग्राहण-प्ररूपण-व्याख्यानानि प्रचलन्ति स्म। वस्तुस्वरूपबोधनमवग्राहणम्। प्रकृष्टरूपणं, समग्रनिरूपणं वा प्ररूपणम्[३४]। विधि-प्रतिषेधाभ्यामर्थप्ररूपणं व्याख्यानम्। वेदाध्ययनेन सह वैदिकदृष्ट्या दर्शनानां तुलनात्मकमध्ययनं खण्डन-मण्डनवादपद्धतिश्च महामठस्य विशिष्टता आसीदिति सारः। वैदिकानि अवैदिकानि च दर्शनानि पठ्यन्ते। योगदर्शनं विहाय सर्वाणि दर्शनानि सविषयमुल्लिखितानि। सांख्यादीनां प्रतिपाद्यपरामर्शे श्रद्धेयांशाः पुरस्कृताः। सर्वोपरि मीमांसा इति पूर्व-उत्तरभागसंयुता षोडशाध्यायी एव परामृष्टा; न केवलं द्वादशलक्षणी, वेदान्तो वा।

तक्षशिला, अयोध्या, काञ्ची इत्यादिमहानगरीन् तत्रत्याः शिक्षणव्यवस्थाश्च दृष्ट्वा एव कुवलयचन्द्रराजकुमारो विजयापुरीमायातवान्। मन्त्रजपमण्डपानि, ब्राह्मणशालाः, रुद्रभवनानि, धार्मिकमठानि इत्यादीनि तत्र तत्र वर्णितानि। परन्तु, केरलीयमहामठं तस्य व्याख्यानमण्डलीं भट्ट-छात्रव्यवहारादिकं च पश्यन् स अद्भुतपरतन्त्रोऽभूत्।

निष्कर्षाः

१) न केवलं केरलेतिहासरचनायै परन्तु दार्शनिकेतिहासरचनायै अपि कुवलयमालाचम्पू नितरामुपयुक्ता भवति।

२) अस्यां वर्णितो विजयापुरीविषयः विषिञ्जं-तिरुवनन्तपुरं देशमेव स्यात्।

३) विषिञ्जं-तिरुवनन्तपुरं नगरसमुच्चयस्य 'विजय' इति नाम्नः सार्थकत्वं सुवचम्।

४) सभामठानि शालापूर्वकालेऽपि केरलेषु प्रवर्तितानि।

५) सभामठेभ्य एव शालायाः कृते भाट्टाः स्नातकछात्राश्च दीयन्ते स्म।

६) ब्राह्मणाधिवासः दक्षिणकेरलेषु अष्टमशतकात्पूर्वमपि सुविन्यस्तोऽभूत्।

७) कुवलयमालया सह अनन्तपुरवर्णनादि केरलीयकृतीनां शोधदृष्ट्या तुलना कार्या। पुरवर्णने तेषु समानताऽत्र प्रदर्शिता।

८) आवलिका-मण्डलीभेदेन मठेषु व्याख्यानसभाप्रवर्तनम्।

९) मठस्थया व्याख्यानमण्डल्या खण्डन-मण्डनभावेन सर्वाणि दर्शनानि वैदिकदृष्ट्या परिगणितानि आसन्।

१०) 'ओत्त्' इति केवलवेदपाठकरणस्य यद्विधानं केरलेषु दृश्यतेऽधुनापि, प्राचीनकालेऽपि तदासीत्।

११) मीमांसायां 'प्रमाणषट्क'ग्रहणेन प्राभाकर-कौमारिलमार्गद्वयस्य ग्रहणं द्रष्टव्यम्।

१२) केरलेषु मीमांसायाः षोडशाध्यायीरूपेण पठनमासीत्। यथा पय्यूर्भट्टाः 'मीमांसाद्वयकुलगुरवः' इति ख्यातिमवाप्ताः पञ्चदशशतके। पदवाक्यप्रमाणज्ञाः मीमांसकाः प्रमाणषट्केन जीवादिनित्यसत्ताविषये, ईश्वरेतर-सर्वज्ञत्वादिविषये च प्ररूपयन्तीति चम्पूमध्ये उल्लेखः विशेषध्यानयोग्यः। जीव-प्रकृति-ब्रह्म इति अनादिसत्तात्रयस्य विवेचनं ब्रह्मसूत्राण्यधिकृत्य कृतम्। बौद्धादीनाम् अनीश्वरवादिनां सर्वज्ञत्वादिवादः पूर्वमीमांसाग्रन्थेषु प्राय उद्धृत्य खण्डितो दृश्यते।

१३) महामीमांसकयोः प्रभाकर-शङ्करयोः कालानन्तरकेरलमेव अत्र प्रकाशितं विद्यते। तदनन्तरकाले मीमांसाद्वयस्य या वृद्धिः सभामठादिद्वारा केरलेषु अविच्छिन्ना दृश्यते तस्याः प्राग्रूपमेव संगृह्य कुवलयमालायां दत्तमित्यनवद्यम्।

उद्धृतस्रोतांसि

१. सव्व-चट्टाणं इति मूलम्। छात्रशब्दस्य चट्ट इति यथा देशीप्राकृतं, तद्वदत्रापि चिन्तनीयम्। तुलना 'चट्टाणं' स्वस्थानम्, 'छट्ठाणं' षट्स्थानम्, 'षड्दर्शनस्थान'मिति यावत्। परन्तु व्याख्येयेषु विषयेषु नवानामुल्लेखोऽत्र लभते योगं त्यक्त्वा पञ्चदश 'नानि, व्याकरणम्, बौद्धम्, जैनम्, लोकायतमिति। देशदेशान्तरछात्रवैपुल्यवशात् 'सर्वशास्त्रस्थानम् इति साधु। सर्वविद्या-कलाभ्यासवशात् 'सर्वशास्त्रस्थान'मित्यपि युज्यते। सर्वचट्टाणं इति मठस्य विशेषणं स्यात्। तत्र केषाञ्चिन्मते सव्व-चट्टाणं इत्यत्र 'सर्वछात्राणाम्' इति षष्ठीग्रहणं न साधु प्रतीयते। Cf. "Bhatta, Oh, Bhatta, this is not a shrine, but it is a matha (Monastery, residential quarter) of all the caṭṭas (students)" – Umakant P Shah, p 250.

2. Umakant P Shah p. 250.
3. *तत्रैव*
4. 242-248 *इति सप्तकथाखण्डैः*
५. Umakath P Shah, CAṬṬĀṆAM MAḌHAM – A GLEANING FROM THE KUVALAYAMĀLĀ-KAHĀ, Annals of the Bhan darkar Oriental Research Institute Vol 48-49, pp. 247-252.
6. Narayanan MGS, KANDALUR SALAI – NEW LIGHT ON The Nature of Aryan Expansion In South India, Proceedings of the Indian History Congress, Vol. 32, VOLUME I (1970), pp. 125-136.
7. Kesavan Veluthat, THE CATTAS AND BHATTAS – A NEW INTERPRETATION, Proceedings of the Indian History Congress, Vol. 36 (1975), pp. 98-109

८. शाला □ शस्त्र-शास्त्राणाम् आवासयमुपरिशिक्षणस्थानम्, कन्तळूर् शालावत्। घटिका/घटक □ राज्यकार्य-मन्त्रिकार्यादिप्रसक्तनां ब्राह्मणादन्- ाामुपरिसभा, उत्तरविद्यास्थानञ्च। काञ्चीघटिकावत्। 'कषक्म्' इति भाषायाम्।

९. कुवलयमाला (कुमा.), सम्पा. डॉ. आदिनाथ नेमिनाथ उपाध्ये, १९५९

१०. "Ratnaprabhasuri was a contemporary of Pradyumnasuri at whose hands was corrected the Kuvalayamalakatha; so, he is to be assigned to the middle of the 13th century AD." – A. N. Upadhye, BORI, 1968.

a) "Kuvalayachandra, the hero of the story, during his wanderings, reaches the big city of Vijayānagarī or Vijayapuri situated on Southern coast of South India, probably in Kerala….I do not think that this Vijayapuri was in Tamil land because while on his way to Vijaya, Kuvalayacandra had asked a merchant from Kanjipuri about the location of Vijaya, but the merchant said that he did not know where it was situated. It is highly probable that Vijayapuri was an ancient Indian port in the far south." - Umakant P Shah pp 250-252

b) "According to this work, Kuvalayachandra, the hero of the sto-

ry, during his wanderings in search of his paramour, reaches the big city of Vijayanagari or Vijayapuri situated in the western part of South India, probably in Kerala." – Aspects of Aryanisation in Kerala, MGS Narayanan, 26-27 P.

c) "Kuvalayamala contains a passage describing an establishment Cattanam madham. The hero Kuvalayachandran is stated to have visited Vijayapuri (Jayastambha) i.e. "Nam' on the southern coast in the course of his search for Kuvalayamala. It has now been accepted that this Cattanam madham is Kandalur Salai on the model of which, Karunandakkan established a Salai at Parthivapuram. Kandalur Salai has been identified with Valiyasalai in the locality of Trivandrum." – Dr. Rajkumar, 2008.

11. "No place in India remains great which had not been so from the earliest times" – TAS Vol I, p 276.
12. *नम्माल्वारस्य (९-१० शत) तिरुवाय्मोषिमध्ये प्रथमः परामर्शः। अनन्तशयनविग्रहप्रतिष्ठानन्तरम् अनन्तपुरमिति संज्ञा।*
१३. Mortimer Wheeler, p 174 etc.
१४. *शूरनाड् १२३*
१५. *उण्णुनिलिसन्देशः, पूर्व.५५*
१६. *अनन्तपुरवर्णनम् ४०*
१७. *के रत्नम्मा, पृ. १२१-१२२*
१८. "Here we have a specimen of eighteen Deśi dialects spoken in the market place of Vijayāpuri which was thus a big cosmopol itan town where merchants from all over the country displayed their goods." - A Cultural Note on the Kuvalayamālā of Udyotanasūri, Dr. Vasudev Sharan Agrawala; Upadhye p.124.
१९. *आरेल्लो मून्नवनिविषये चेर्न्न □ ६न्३उ१८ □ भाषाविशेषम् (१.१७) इति। वृथासङ्केत एव अष्टादशभाषा इति इळङ्कुळं कुञ्जन्पिळ्ळै, पृ ५२। न तद्वथापरामर्श इति कुवलयमालायाः तुलनया सिद्ध्यति।*
२०. *शङ्कु अय्यर् ९३ पृ.*
२१. *तत्रैव ८९ पृ.*

२२. तत्रैव १०४ पृ.

२३. १०६-१०८ श्लोकाः

२४. टि.ए.एस्. प्रथमभागः

२५. पार्थिवपुरं (तिरुवित्याक्कोट्) प्रथमताम्रपत्रम्। तत्रैव।

२६. २४३.१६

२७. ३.५६.१५

२८. अभिधानराजेन्द्रः।

२९. सव्व-चट्टाणं मढम् इत्येतद् विचिन्त्यम्।

३०. अभिधानराजेन्द्रे व्यवहारसूत्रवृत्तितः उद्धृतम्।

३१. संहिता च पदं चैव पदार्थः पदविग्रहः।
चालना च प्रसिद्धिश्च षड्विधं विद्धि लक्षणम्।।
व्याख्याननिर्वचने अभिधानराजेन्द्रः।

३२. पञ्चविधा प्रस्थणा आरोपणा, भजना, पृच्छा, वाचना, निर्यापनेति।

सहायकग्रन्थसूची

संस्कृत-प्राकृतग्रन्थाः

१) उद्योतसूरिः, कुवलयमाला, सम्पा. डॉ. आदिनाथ नेमिनाथ उपाध्ये, सिन्धी जैनशास्त्रशिक्षापीठम्, मुम्बई, १९५९

२) रत्नप्रभासूरिः, कुवलयमालाकथासंक्षेपः, सिन्धीजैनशास्त्रशिक्षापीठम्, मुम्बई, १९६१

३) विजयराजेन्द्रमुनिः, अभिधानराजेन्द्रः (१-७ भागाः)

मलयाल(मणिप्रवाळ)ग्रन्थाः

४) शूरनाट्टु कुञ्ञन्पिळळ, अनन्तपुरवर्णनम् पठनम् (के. रत्नम्मा ११९-१३६ पृ.)

५) के. रत्नम्मा, अनन्तपुरवर्णनम् पाठवुं पठनङ्ङळुम्, केरळभाषा इन्स्टिट्यूट्ट्, तिरुवनन्तपुरम्, १९९७,२०१५

६) प्रोफ. इळंकुळं कुञ्ञन्पिळळ, उण्णुनीलिसन्देशम्,

एस्पिसिएस्, कोट्टयम् १९५४, २०१६

७) शङ्कु अय्यर्, केरलचरित्रत्तिले चिल अज्ञातभागङ्ङळ्, ८१-१०९ पृ (कान्तळूर् शाला इति चतुर्थोऽध्यायः), एन्बिएस्, १९६३

आङ्गलेयग्रन्थाः

१. A N Upadhye, The Kuvalayamālā-Kathā of Ratnaprabhasūri (BORI Annals Vol 48-49)

2. Dr. Rajkumar, Encyclopaedia of Untouchables Ancient, Medieval and Modern, Kalpaz Publications, Delhi, 2008.

3. MGS Narayanan, Aspects of Aryanisation in Kerala, Kerala Historical Society, 1973

4. Sir Mortimer Wheeler, Rome Beyond the Imperial Frontiers, G.Bell & Sons, Ltd London 1954

5. T A Gopinatha Rao, Travancore Archaeological Series, Vol. I (TAS Vol I), Department of Cultural Publications, Govt. of Kerala, 1908, 1988

6. Annals of the Bhandarkar Oriental Research Institute Vol 48-49, Golden Jubilee Volume 1917-1967 (1968)

7. Proceedings of the Indian History Congress, 1970, 1975